त्रयोदशः पाठः

# चतुरः वानरः

**लङ्लकारः - लृट्लकारः/क्त्वा प्रत्ययः**

एकस्मिन् नदीतीरे एकः जम्बूवृक्षः आसीत्। तस्मिन् एकः वानरः प्रतिवसति स्म। सः नित्यं जम्बूफलानि खादति स्म। कश्चित् मकरः तस्य मित्रम् आसीत्। सः वानरः प्रतिदिनं तस्मै जम्बूफलानि ददाति स्म। अतः सः मकरः तस्य वानरस्य प्रियं मित्रम् अभवत्।



एकदा मकरः कानिचित् जम्बूफलानि स्वपत्न्यै अयच्छत्। तानि खादित्वा तस्य पत्नी अचिन्तयत्, ''अहो! सः वानरः प्रतिदिनं मधुराणि जम्बूफलानि खादति। अतः नूनं तस्य हृदयमपि अतिमधुरं भविष्यति'' इति। सा स्वपतिम् अवदत्, ''भो प्रतिदिनं मधुराणि जम्बूफलानि खादित्वा तव वानरमित्रस्य हृदयं कियत् मधुरं स्यात्? तस्य हृदयं खादित्वा मम हृदयमपि अतिमधुरं भविष्यति। तत् यदि माम् जीवितां दृष्टुम् इच्छसि तर्हि आनय शीघ्रं तस्य वानरस्य हृदयम्।''

मकरः स्वपत्नीं बहुविधैः उपायैः निवारितवान्। परं सा दृढनिश्चया आसीत्। विवशः मकरः स्वमित्रं वानरं प्रति गत्वा अवदत्, ''मित्र प्रतिदिनम् अहम् एव अत्र आगच्छामि। अद्य त्वं मम गृहमागच्छ।''

वानरः प्रत्युवाच, ''त्वं तु जले वससि, कथम् अहं तत्र गन्तुं शक्नोमि?''



मकरः अवदत्, ''अलं चिन्तया। त्वं मम पृष्ठोपरि उपविश। अहं त्वां नेष्यामि।''

यदा तौ नद्याः मध्यभागे स्थितौ तदा मकरः वानरम् अवदत्, ''मम पत्नी तव हृदयं खादितुम् इच्छति। अतः त्वां मम गृहं नयामि।''

मकरस्य वचनेन वानरः भीतः। किन्तु चतुरः वानरः शीघ्रम् अवदत्, ''रे मित्र! मम हृदयं तु वृक्षस्य कोटरे निहितम्। अतः त्वं शीघ्रं मां तत्र नय। अहं प्रमुदितमना मम हृदयं तुभ्यं दास्यामि। मकरः वानरं पुनः तस्यावासम् आनीतवान्। चतुरः वानरः शीघ्रं कूर्दित्वा वृक्षोपरि आरुहत्।

वानरः उच्चैः हसित्वा मकरम् अवदत्, ''रे मूर्ख! किं हृदयं कदापि शरीरात् पृथक् भवति? त्वं मूर्खः असि। इतः परं त्वया सह मम मैत्री समाप्ता।''

इति उक्त्वा वानरः पुनः मधुराणि जम्बूफलानि अभक्षयत्।

विश्वासो हि ययोर्मध्ये तयोर्मध्येऽस्ति सौहृदम्।
यस्मिन्नैवास्ति विश्वासः तस्मिन् मैत्री क्व सम्भवा।।

### शब्दार्थाः

| | | | |
|---|---|---|---|
| जम्बूवृक्षः | = जामुन का पेड़ | प्रतिवसति स्म | = रहता था। |
| कानिचित् | = कुछ | खादित्वा | = खाकर |
| चिन्तयित्वा | = सोचकर | कियत् | = कितना |
| स्यात् | = होना चाहिए | तर्हि | = तो |
| आनय | = लाओ | बहुविधैः | = अनेक प्रकार से |
| निवारितवान् | = रोका | अद्य | = आज |

| | | | |
|---|---|---|---|
| प्रत्युवाच | = उत्तर दिया | शक्नोमि | = सकता हूँ |
| अलं चिन्तया | = चिन्ता मत करो | नेष्यामि | = ले जाऊँगा |
| नद्याः | = नदी के | | |
| खादितुम् इच्छति | = खाने के लिए इच्छा करती है/करता है | | |
| कोटरे | = खोखले में | प्रमुदितमना | = प्रसन्न मन से |
| आरूहत् | = चढ़ गया | इतः परम् | = इसके बाद |
| अभक्षयत् | = खाए | सौहृदम् | = मित्रता |

## अभ्यासः

१. एकपदेन उत्तरं लिखत–

(क) जम्बूवृक्षः कुत्र आसीत्?

(ख) कः प्रतिदिनं जम्बूफलानि खादति स्म?

(ग) वानरस्य मित्रं कः आसीत्?

(घ) का वानरस्य हृदयं खादितुम् इच्छति?

२. एकवाक्येन उत्तरं लिखत–

(क) वानरः कस्मै जम्बूफलानि ददाति स्म?

(ख) मकरः कस्यै जम्बूफलानि अयच्छत्?

(घ) वानरः कीदृशानि फलानि खादति स्म?

(ङ) नद्याः मध्ये मकरः वानरं किम् अवदत्?

३. रिक्तस्थानानि पूरयत–

| | | | |
|---|---|---|---|
| यथा– | मधुरं फलं | मधुरे फले | मधुराणि फलानि |
| (क) | शुष्कं पत्रं | ...................... | .................... |
| (ख) | रक्तं कमलं | ...................... | ..................... |
| (ग) | निर्मलं हृदयं | ...................... | ..................... |
| (घ) | स्वस्थं शरीरं | ...................... | ..................... |
| (ङ) | सुन्दरं गृहम् | ...................... | ..................... |

४. ध्यानेन वाक्यं पठित्वा पुनः लिखत–

यथा– वानरः वृक्षे अवसत्। वानरः वृक्षे वसति स्म।

(क) निखिलः गृहं अगच्छत्।

(ख) रामः वने अवसत्।

(ग) पिता पुत्रं अवदत्।

(घ) सा उच्चैः अहसत्।

५. उदाहरणम् अनुसृत्य लिखत–

यथा– खाद् + क्त्वा = खादित्वा

मकरः जम्बूफलानि खादित्वा प्रसन्नः अभवत्।

| | | |
|---|---|---|
| (क) | बालकः विद्यालयं ............. पाठं पठति। | गम् + क्त्वा |
| (ख) | बालिका उच्चैः .................. वदति। | हस् + क्त्वा |
| (ग) | वानरः वृक्षे ................. तिष्ठति। | कूर्द + क्त्वा |
| (घ) | बालकः पाठं .................. खेलति। | पठ् + क्त्वा |

६. उचितक्रियापदं योजयत–

| | | |
|---|---|---|
| (क) | त्वं कुत्र ......................... । | (गमिष्यसि/गमिष्यति) |
| (ख) | अहं पत्रं ..........................। | (लेखिष्यामि/लिखिष्यन्ति) |
| (ग) | वयं पुष्पाणि ......................। | (आनेष्यन्ति/आनेष्यामः) |
| (घ) | यूयं कदा ......................। | (वदिष्यसि/वदिष्यथ) |
| (ङ) | सः फलं ......................। | (खादिष्यति/आगमिष्यति) |
| (च) | ते उच्चैः ......................। | (हसिष्यावः/हसिष्यन्ति) |
| (छ) | किं युवां भोपालनगरे ......................। | (वसिष्यथः/वसिष्यथ) |
| (ज) | आवां पाठं ......................। | (पठिष्यावः/पठिष्यथः) |
| (झ) | तौ विद्यालयं ......................। | (आगमिष्यतः/आगमिष्यन्ति) |

योग्यताविस्तारः –

- कथां आधृत्य क्रमानुसारं पुनः लिखत–

(क) त्वं तु जले वससि, कथम् अहं तत्र गन्तुं शक्नोमि।

(ख) परं सा दृढ़निश्चया आसीत्।

(ग) एकस्मिन् नदीतीरे एकः जम्बूवृक्षः आसीत्।

(घ) अद्य त्वं मम गृहमागच्छ।